संस्कृतव्याकरणम्

MAVYC 201

प्रौढमनोरमा - 2

प्रथमपत्रम्

पूर्णाङ्काः – 80

समयः –घण्टात्रयम्

अधस्तानानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम्। **1×10=10**

1. अव्युत्पन्नानां शब्दानां प्रातिपदिकसंज्ञाविधायकं सूत्रं किम् ?
2. प्रातिपदिकग्रहणे... परिभाषा पूरणीया ?
3. आदेशप्रत्यययोः सूत्रे आदेशप्रत्ययावयवश्चेति अर्थद्वयं कथं लभ्यते?
4. व्यवधाने णत्वविधायकं सूत्रं किम् ?
5. सर्वादीनि इत्यत्र कः समासः?
6. अकृतव्यूहाः पाणिनीयाः इयं परिभाषा नित्या अनित्या वा?
7. रषाभ्यां नो णः समानपदे, सूत्रे समानग्रहणं किमर्थम् ?
8. सख्युरसम्बुद्धौ सूत्रे सर्वनामस्थाने पदं कुत अनुवर्तते ?
9. प्रत्ययलोपे प्रत्ययलक्षणम्, कीदृशं सूत्रम् ?
10. क्रोष्टुशब्दस्य कोऽर्थः?

अधस्तनेषु पञ्चप्रश्नाः समाधेयाः। **6×5 = 30**

11. अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, सूत्रं व्याख्यायताम्।
12. सरूपाणामेकशेष एकविभक्तौ, सूत्रं प्रतिपाद्यताम् ?
13. सर्वादीनि सर्वनामानि, सूत्रं विमृश्यताम्।
14. आदेशप्रत्ययययोः, सूत्रं व्याख्यायताम्।
15. प्रत्ययलोपे प्रत्ययलक्षणमिति, सूत्रं व्याख्यायताम्।
16. हल्ङ्याभ्यो दीर्घात्सुतिस्यपृक्तं हल्, सूत्रं व्याख्यायताम्।
17. जराया जरसन्यतरस्यामिति सूत्रं व्याख्यायताम्।

अधस्तनेषु चत्वारः प्रश्नाः समाधेयाः। **10×4 = 40**

18. कृत्तद्धितसमासाश्च, सूत्रं व्याख्यायताम् ।
19. सुपः, सूत्रं व्याख्यायताम् ।
20. अट्कुप्वाङ्नुम्व्यवायेऽपि, सूत्रं परिष्क्रियताम्।
21. आमि सर्वनाम्नः सुट् , सूत्रं व्याख्यायताम्।
22. रषाभ्यां नो णः समानपदे,सूत्रं व्याख्यायताम्।
23. रायो हलि, सूत्रं व्याख्यायताम्।

****